This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M 1949 विषय व्याकरण

नाव. कारकविवरण (त्रिलोचनटीकासहितम्)

लेखक/लिपीकार [illegible]

पृष्ठ 3 काळ संवत 1828 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथापि ये केचन वैयाकरणाः कायवाङ्मनोभिः संसेवितभगवत्पाणिनिचरणाः स्वकपोलकल्पितविविधवादास्तत्र च
नास्तर्कविचारचातुरीधुरीणमीमांसापारावारोत्तरणसत्तरीभवन्तिसानवीनाः परित्यज्यैवं कर्मलक्षणं ब्रुवते वसत्यं त्रयाति
रिक्तं जगदेव मिथ्येत्यादि वदन्ति वेदान्तिनो ऽख्यातिरिक्तं जगदेव वितन्वाविसावरीचरीजम्बरदरीनिवेसयन्तः खं मनेहम्म
तानुयायिनेतुनयोऽइषयन्ति अत्र वयं खण्डनकृन्मतानुयायिनः समादध्मः क्रियाविषयत्वं कर्मत्वं धात्वर्थः क्रियानद्वि
यता च कचित्साक्षात्कचित्परंपराया तत्रात्मानं जानामीत्यादौ ज्ञानक्रियाविषयता साक्षाद्देवात्मादेरिति कर्मत्वं तस्या
ति अत एव वह्निमनुमिनोमीत्यत्रानुमितेर्विषयाऽन्यत्वेन वह्नेरनुमित्यजनकतयाप्यनुमितिक्रियाविषयतया वह्नेः कर्मत्वमि
ति कर्मणि द्वितीयापि संगच्छते साधुवार्थिका द्वितीयापि केचित्समादधिरे घटं करोति कुलाल इत्यादौ घटपदस्योपादानलक्षणा
या कपालपरत्वेन कृतिरूपक्रियाविषयत्वात्तस्य कर्मतायामादेर्गमनक्रियाजन्यसंयोगरूपव्यापारविषयत्वात्कर्मत्वं संयोग
विषयत्वमपि संयोगजन्यत्वस्य स्वविषयतयेति सर्वं समंजसं कर्त्रादौ कारके यदीदं कर्मत्वं तिष्ठति तथापि विवक्षातः कारकाणि
भवन्तीति तत्र वाचका द्वितीयापि विवक्षापि शिष्टप्रयोगानुसारिणी अन्यथातिप्रसंगादिति प्राप्यविकार्यनिर्वर्त्यसंस्कार्यभेदा
च्चतुर्विधं कर्म तेन संगृहीतमिति न काचिदनुपपत्तिरित्यास्तां विस्तरः १ अथ कः कर्त्ता यः करोति स कर्त्तेति चेत्तन्न तस्य
हि स्वतन्त्रस्य यः क्रियां करोति स कर्त्ता स्यादिति कटसंज्ञो भवतीत्यर्थः तथा च यत्र क्रिया नित्या तत्रासंभवः समवेतीति चेत्तन्न को
मसवैज्ञानानि परमेश्वरज्ञानसमवायव्योमादिना परमेश्वरज्ञानेक्रियाणां नित्यत्वेन तदजनकतया परमेश्वरादीनां न कर्त्ता
ईश्वरं न स्यात् क्रियत इति क्रियासाध्यत्वमुच्यते न समवायादिरूपा क्रिया नित्यासाध्या स विवक्षितुमर्हति न च व्याघ्रमिदमसिद्धं वा साध्ये
नवतीयते आश्रितत्वं कर्मरूपत्वं साक्रियेनासिधीयते इति वाच्यं ब्रवीयत इत्यनेन किं स्वमतसाधारणी त्वनीति निर्विवक्षितं वा भ्रमा
रूपैव वा अन्त्ये समवायादेरक्रियात्वापत्तिः आद्ये नित्यस्यापि क्रियात्वापत्तिः न च धात्वर्थः क्रियान्योन्याश्रयात् क्रियावावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारकविवर

२

त्वस्य धारुत्वात् किंचेश्वरः तज्ज्ञानक्रिययोरुत्पन्नत्वेन स्वमात्मानं स्वयमेव जानाति भगवान् परमेश्वर इत्यत्र कर्तृकर्मक्रि
यालक्षणानि सर्वथैवात्मान्यानीति अत एव परिदृष्टसामर्थ्यं कारकचक्रं प्रयोक्तृत्वं कर्मत्वमेतदेव स्वतंत्रं कर्तृत्वात्र कर्तुः स्वा
तंत्र्यमुच्यते अदृष्टाद्वारकं कार्यं तु कृत्वे कृतिसमवायित्वं कर्तृत्वं तेनाचेतनानां कर्तॄणां रथादीनामंगच्छतीति लक्षणया रथः क
र्तोच्यत इति न्यायमतमप्यास्तां सर्वं जानाति परमेश्वर इत्यत्र तज्ज्ञानक्रिययोर्नित्यत्वेनेश्वरस्याकर्तृतापत्तेस्तस्मात्कर्तृत्व
दुर्वचनमिति अत्रोच्यते यत्कार्यं तु कृतेकृतिसमवायीयः स तत्कार्त्रोच्यते अथवा नेन व्यपदेशो गौणः सर्वं जानाति
भगवान् परमेश्वर इत्यत्रापि तथैति संक्षेपः २ ननु येन क्रियते तत्करणमिति लक्षणमयुक्तं विकल्पासहत्वात् तथा हि येने
ति तृतीया किं सहार्थे उत सिते गेवा आहोस्वित् विशेषणे उतस्वित् करणे किं सिद्धे तौ वा तत्र नाद्यः दात्रेण धान्येन तु नातीय
त्र दात्रस्यैव धान्यस्यापि करणत्वप्रसंगात् दात्रसाहित्यवद्धान्यसाहित्यस्यापि तद्धेतुत्वात् नहि छेद्ये छेत्ता रिवा असन्निधिरो
पपद्यते न द्वितीयः अरुणा कालेन इत्यत्रैव दात्रस्यानंगत्वेन्नाकरणत्वापत्तेः न तृतीयः तरति ब्रह्महत्यां योऽश्वमेधे
न यजते तपसा राज्यं ज्ञानेन मोक्ष इत्यादावश्वमेधादीनां करणत्वे कर्तृत्वप्रसंगात् तेषामाशुविनाशितया विद्यमानतया
विशेषणत्वासंभवात् विद्यमानं हि विशेषणं भवति अत एव जटाभिस्तापसमद्राक्षीत् शिखया परिव्राजकमपश्यद् इत्या
दौ विशेषणे तृतीयामुदाजहार जटादीनां विद्यमानतया विशेषणत्वात् नापि तुर्यो अन्योन्याश्रयात् आत्माश्रयत्वाच्च करण
=श्री= त्वे ज्ञाते तद्घटितेस्य लक्षणं ज्ञातव्यं तल्लक्षणत्वज्ञाने लक्षणज्ञाने जाते करणमित्यात्माश्रयत्वं पर्यवसन्नं नापि पंचमः धनेन
कुलमन्नेन कुलमन्नेन वसतीत्यादावविवक्षमेन वह्निमनुमिनोमीत्यत्र धूमस्यानीतानागतसाधनानुमतिं प्रत्युत्वात्
करणत्वोच्छेदप्रसंगात् अथ साधकतममिति मित्यास्तां लक्षणमिति विलक्षणमिति चेन्नातरतमाद्यर्थस्यानतिप्रसक्त २
स्य निर्वक्तुमशक्यत्वात् न च प्रकृष्टं साधकं साधकतममिति वाच्यं किं नाम प्रकृष्टत्वं अनन्यथासिद्धव्यतिरेकत्वा

लित्वं तथा हि दात्रे सति छेदनक्रियातद्व्यतिरेकेन छिदेति चेत् कर्तृकर्मणोरप्येवं करणस्यातां सन्निधाने छेद्ये न रिवछिद्रे
न्यन्वयव्यतिरेकयोस्तत्रापि तौल्यादन्यदपि तयोः करणत्ववत् कारणत्वमविशेषेण अत एव क्रिययाह्ययोगव्यवच्छेदेन सं
बंधिकारणं तदेव प्रकृष्टसाधकतममिति वैयाकरणकेशरीरारटीत्यत्राप्यपास्तं यदा कदाचित् क्रियायोगव्यवच्छेदस्य
कर्त्रादेरपि सत्वात् सार्वदिकव्यवच्छेदस्य करणेप्यसत्वात् हि दात्रं सर्वदैव धान्यं छिनत्ति छिनत्ति सर्वदैव कदाचित्ता न छिनत्ती
ति न च सकलकारणसमवहिते सति क्रियासत्वस्य एवेति वाच्यं कर्त्रादेरपि सकलहेतुरामवहिताक्रियाक्रियोत्पत्ते
रावश्यकत्वादिति प्रसंगात् प्रकृतमनुपवात् तस्मात् करणं दुर्वचमिति अगरूकेवा वद केशाग्रंतसार महं वावदीमि व्यापारवत्कार
णं करणं व्यापारवत्वं च तज्जन्यत्वे सति तज्जन्यजनकत्वं तेन दात्रेण संयोगस्य व्यापारस्याधारत्वेन दात्रादेः करणसंज्ञा घटीति
चक्षुषा घटं पश्यामीत्यादौ चक्षुर्घटसंयोगवत्तया चक्षुः करणतामासादयति एवमन्यत्राप्यूहनीयं न च छेद्याद्ययोरपि सं
योगाश्रयत्वेन करणतापत्तिरिति वाच्यं यद्वचिन्नं प्रतिजनकीभूतो व्यापारी येन विनायदवच्छिन्नं न जनयति तस्यैव न
व्यापारवत्वादिति पक्षधरमिश्रे ज्ञानकरणकं ज्ञानं प्रत्यक्षमिति वस्तु रूपे विवेचितमिति न क्वापि अनतिप्रसंगं व्यवहारार्थं
वा १ आहोस्वित् चतुर्थीविभक्तिः प्रयोगार्थं वा तत्र नाद्यः ब्राह्मणाय गां ददातीत्यत्र ब्राह्मणे स्वत्वरूपे रोचते संनिधेर्देवदत्ता
य शतं धारयतीत्यत्र सदाने न व्यवहारासंभवात् तथा चोक्तं प्रसंप्रदानं तदेव स्यात् [illegible] गृहकाम्यया दीयमानेन
संयोगात् स्वामित्वं लभते यदि १ अनुमतनिराकर्तृत्वेन त्यागकारणत्वाप्येना [illegible] ददातेः संप्रदानत्वकीर्तितं न च
रुचेर्धारयतेर्वा प्रयोगे य संप्रदानं वैयाकरणै रुच्यते तन्न संप्रदानलक्षणं गच्छते न द्वितीयः उपक्षेपः स्पृहयति अ
यं दुरात्मा परमात्मने विद्रुह्यति किं तु नर्मदामित्यादौ चतुर्थी प्रयोगदर्शनाद् अपि वररुचेर्धारयतेर्वा प्रयोगस्य ब
हुशो दर्शनात् न तदुक्तं विद्यानं देनवा शक्तस्य व्यवस्थावाचि [illegible] ब्राह्मणस्य ददातीत्यपि स्यादेवकचेर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारकवि.
२

पिप्रयोगौ राज्ञोरोचते त्वयानमंत्रिणइत्यादौ षष्ठीप्रयोगदर्शनात् निस्वरेव विस्टंराज्ञोरोचते छन्नमित्यादयोपि तदेत
च्चेनिरस्तारिमहाभाष्यकैयटरीत्या तृतीयादिविभक्तिविषये सर्वत्रसंबंधविवक्षायां षष्ठीदरीहत्रपते इतीयपक्षेत्र
वयं विवादामहे अत्यंतायोगव्यवच्छेदस्य शिष्टप्रयोगानुसारेण सर्वसम्मतत्वात् अन्ययोगव्यवच्छेदं तु न केपि स्वीकुर्वंतु
रित्यास्तां विस्तरः अत्रोच्यते स्वस्वत्वध्वंसस्तर्वक परस्वत्वापत्तिफलकेवा विशेषस्य दानेरर्थस्य बाधे संप्रदानमिति
गीयते ततश्च ददातेः कर्मणि यस्य स्वत्वमुत्पाद्यते तत्संप्रदानं अन्यथा संप्रदीयते स्मिन्निति संप्रदानं संप्रदीयतेने.
नेतिवाऽनुत्पत्तौ तु इत्यन्वयेन सिद्धः संप्रदानशब्दः कथं ब्राह्मणादौ प्रवर्तते इति संक्षेपः ननु यतोपैति समयमादत्ते वा
तदपादानमिति लक्षणमयुक्तं विकल्पासहत्वात् कस्माद्वदपायः विभागो वा नाशो वा किंस्वित् इस्यत्र गमनं वोच्या
दौ स्थित्यतनं वा तत्र नाद्यः विभागस्य द्विष्ठत्वेन वृक्षात्पर्णं पततीतिवत् पर्णाद्वृक्षः पततीति प्रयोगापत्तेः न द्वितीयः कुरुर
श्रहाराद्यदीनष्टइतिवत् वृक्षात्पर्णं नश्यतीति स्यात् न तु नस्तृतीयः गुरोरधीते विद्यामित्यत्र विद्यायां अपरत्वेनान्यत्र
गमनाभावादपादानत्वं न स्यात् न च गतिः प्राप्तिस्तत्राप्यस्तीति वाच्यं प्राप्तिपरिस्पंदात्मकसाधारणगमनत्वाभावेनानतु
गमात् नापि चतुर्थः आदिवनाद्गमउगच्छतीत्यादयो विप्रयोगानुत्पत्तेः अथः संयोगफलकाहि पतनक्रिया न चोर्ध्वमी.
वतोद्वयमप्यसाभ्यं संभवति यतो संभवति तदपादानमित्यविनश्याघ्राद्विभेतीतिवत् व्याघ्रादेव रक्षतिबिभेतीत्यपि स्या
त् विनापि स्वरेण बिभेतीति तृतीया न स्यात् सीता दृत्तरावणाद्दाशरथी रामो नमनागपि बिभेतीत्यादौ भयाभावे पादान
नस्याभ्रेततः पंचमी यतऽत्रादत्ते तदपादानमित्यपि न सुंदरं आउः सर्वोददाति गृह्णते साधुत्वे चवर्तते नेत्तथा चात्र ग्रहण
र्थोस्यपणार्थोवा इदवसितत्कमलोदरे मधुनि मधुकरः पिबति इत्यत्र मधुकरो रौरीनीत्यपादानप्रसंगात् न त
स्मादपादानत्वं दुर्वचनमिति चेन्न पंचमीप्रयोगार्थमियमपादानसंज्ञा वैयाकरणैः पारिभाषिकी समस्तापि न लक्षण

तथा शिष्टप्रयोगानुसारेणापादानं बुद्धौ अपादानत्वं विवक्षया अपादानात्पंचमीप्रयोक्तव्येति तदुक्तं सर्वैकवाक्यतया
विवक्षातः कारकाणि भवंति दुर्गसिंहोपि संकेतसाम्य विधिनसिंहः क्रियाकारकव्यवहृतेर्बुद्ध्यावस्थानिबंधनमित्याहु
कंसर्वोतिप्रसंगानुक्तस्तं चकारेत्यत्र तेपद्वत्वेन दइतिवद्दुग्धकृषइत्यपिस्यात् न चेष्टापत्तिः सत्यपि भेदायगमे नाथतवाहं
नमामकीनस्त्वं सामुद्रो हितरंगः कचन समुद्रो न तारंग इत्युक्तिविरोधात् यद्यपि ममवस्तुः परमेश्वरः समुद्रस्य कारण
पयस्तरंगस्य कारणं समुद्र इति भवस्येव तथापि पदांतरत्वरूपमंतरेण तरंगस्य समुद्रो ममकुतः तत्केनेत्यनतात्पर्यात् किं
चराहोः शिरइत्यत्र कथं षष्ठी राहोः शिरः स्वरूपत्वेन संबंधाभावात् न चाएवत्वेदएवसंबंधः भेदे संबंधसत्त्वाते षष्ठी अभेदे
तमामतेति विरोधापत्तेरितिचेत उच्यते अविशिष्टबुद्ध्यनियामकत्वेसति विशिष्टबुद्धिनियामकः संबंधः यद्वा अवशि
ष्टबुद्ध्यविषयत्वेसति विशिष्टबुद्धिविषयः अथवा विशिष्टबुद्ध्यजनकत्वेसति विशिष्टबुद्धिजनकः विशेषाप्यत्वेसति वि
शिष्टबुद्धिविषयोवा संबंधः कश्चित्संयोगस्यापि स्वरूपकत्वेव वाच्यवाचकत्वेव कार्यकारणभावविषयविषयित्वा
वत्तित्वयोग्यत्वयोगित्वाधाराधेयत्वादीनां संबंधानां स्वरूपद्वयस्य स्वरूपसंबंधत्वात् न तु राहोः शिर इत्यत्र वास्तवा
वयविभावसंबंधविवक्षया तु इयोर्नाम्नोरयातनाशरीराणीत्यत्र संस्थानसंस्थानिभेदविवक्षया लोकसेयायतनविवक्षया
वा षष्ठी नहि विवक्षा कश्चित् नानासंबंधमादाय सर्वत्र षष्ठीप्रसक्तौ विभक्तत्वं नरविशेषापत्तिरितिचेन्न शिष्टप्रयोगानुसारेणा
विवक्षारावश्यपादयंतीसर्वातिप्रसंगसंगाय भविष्यति न चान्यथा अतएवदानमात्रे चतुर्थ्यर्थ इति दानधातोरुपादित्व
विधुनेनात्मनेपदप्रकरणे दास्यासंयच्छेनेधनंकामुकइत्यत्र दास्याइति तृतीयां तेन दास्यै ददाति इत्यर्थो वगतो नचविवा
क्षमंतरेण केनापि सूत्रेण चतुर्थ्यतोरतृतीया विहिता तस्मात्प्रयोगसाधुत्वे व्याकरणमतं तत्र शिष्टप्रयोगस्यैव तत्र नियाम
कत्वात् तदुक्तं महाभाष्यकैयटरणैः नहि वचं तिपरःप्रभुरुपनेति तथा धरतीत्यपि नेनवचं निरतीत्यादयो हि प्रयोगाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकलव्याकरणसिद्धा अपि नशिष्टैः व्युत्पाद्यते ६ ननु य आधारस्तदधिकरणमिति सूत्रं तद्वृत्तिश्च आध्रियते यस्मिन् क्रिया
स्तदधिकरणमिति न युक्तं नहि घटः कटे आ इति पर्यायशब्दोपादाने तद्रूपयोः प्रयुज्यते इह रविषौ च मित्यगोत्रगोवस्यनित्यवे
नासाध्यतया क्रियाश्रयेसावाद्व्याप्तेः नचयस्य आश्रयः सतदाधार इति वाच्यं संबंधमंतरेणाधारवेगो वाश्रययोरपि न था
पत्तेः संबंधेनंतवे अनवस्थानात्स्येवसंबंधवे आतान्याश्रयाचात नउक्तं नहि सुशिक्षितोनटः वेउः स्वस्कंधमारुह्य स्यति ना
पिसमवायेन उक्तदेशधानस्यत्रेदसावात् नापिसंयोगेन उक्तदेशधातिरद्विउक्तदमित्यपि स्यात् संयोगस्यासयनिष्टत्वात् स्ततने
घटासावइत्यत्र संयोगसमवाययोरसावात् नापिस्वरूपसंबंधेनस्ततलेघटासाव इति वघटासावो स्ततलमित्यपिस्या
त् नचगुरुत्वासमवायिकारणका घतनक्रियाप्रतिबंधकत्वमाधारत्वं इह गवि गोत्वमित्यादौ तदसावात् तस्मादाधारत्वं
दुर्वचनमितिचेन्न अधिकरणे सप्तमी [illegible] गार्थमाधारसंज्ञा विधीयते तत्राधारतानियामकः संबंधः कश्चिदस्ति
एववाच्यः कथमन्यथा हरे शाखा न तु हरौ [illegible] यामिति अतएव उक्तं दस्याधारत्वं ननु द्रव्यः एते न गंगायां घोषः इति
वसति अंगुल्यग्रे करिणां शतमित्यादयः सिद्धाः कर्तोः कर्मच करणं संप्रदानं तथैव च अपादानाधिकरणमित्याहुः कार
काणि षट् १ इतिश्रीमहामहोपाध्यायश्रीगंगूतक सिंह भट्टाचार्य श्री मणिकंठ विरचितायां त्रिलोचनचंद्रिकायां षट्
कारकखंडनमंडनं समाप्तमिति ॥ संवत् १८[illegible] मिति राधमासे कृष्णाष्टम्यां कर्मवाट्यां तत्त्वकुमार मुनिना लेखि ॥
वा. १ योदयमुनी ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.19 11:42
,TRANSFERRED=2019/07/24 at 16:17:17
,PAGES=5
,TYPE=STD
,NAME=S0001098
,Book Name=M-1949-KARAKVIVRAN KRIKOCHATIKASAHITAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection